National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2026; 1(65): 374-377
© 2026 NJHSR
www.sanskritarticle.com

**प्रो. प्रभाकरप्रसादः**
आचार्यः, सर्वदर्शनविभागः,
श्री.ला.ब.शा.रा.सं.विश्वविद्यालयः,
नव देहली- १६

**Correspondence:**
**प्रो. प्रभाकरप्रसादः**
आचार्यः, सर्वदर्शनविभागः,
श्री.ला.ब.शा.रा.सं.विश्वविद्यालयः,
नव देहली- १६

# अद्वैतिनामभिमतं शब्दप्रमाणस्वरूपम्

**प्रो. प्रभाकरप्रसादः**

**नमः प्रमाणमूलाय कवये शास्त्रयोनये ।**
**प्रवृत्ताय निवृत्ताय निगमाय नमो नमः ।।**

प्रमाणाद्धि प्रमेयसिद्धिः प्रमेयं च वेदान्तानां ब्रह्म। तत्सिद्धिश्च शब्दप्रमाणान्न त्वितरप्रमाणेभ्यः[1] प्रत्यक्षाविषयत्त्वात्, लिङ्गाभावात्, **"तन्त्वौपनिषदं पुरुषमित्यादिश्रुतिभ्यश्च।"** प्रमाणव्यवस्था च लक्षणाधीना, तदुक्तम्-

**"मानाधीना मेयसिद्धिर्मानसिद्धिश्च लक्षणात्"[2]** इति। अत आदौ शब्दप्रमाणलक्षणं विचार्यते। शब्दप्रमाणं नैयायिकैः साङ्ख्यैः तथा भाट्टैः वेदान्ति-भिश्च स्वीक्रियते। प्राभाकरैस्तु शास्त्रस्यैव प्रामाण्यम्, लौकिकशब्दस्यानुमानविधया प्रामाण्यमिति स्वीक्रियते। शाक्यैः काणादैश्च शब्दस्यानुमानविधयैव सर्वत्र प्रामाण्यमुररीक्रियते। सम्प्रदायसम्मतं शाब्दप्रमाणलक्षणमेवमस्ति।

**शब्दविज्ञानजा यार्थे सन्निकृष्टे सुनिश्चिता ।**
**बुद्धिस्तच्छाब्दमानं हि सङ्गिरन्ते विपश्चितः ।।[3] इति ।।**

अत्रासन्निकृष्टपदं प्रमाणन्तरागोचरताबोधकम्। सूपसर्गघटितनिश्चितपदेनासन्दिग्धा- विपर्यस्तरूप-मित्यर्थो लभ्यते। एवं च शब्दविज्ञानजं प्रमाणान्तरागोचरमर्थविषयमसन्धिग्धाविपर्यस्तज्ञानं शाब्दप्रमाणमिति फलितम्। प्रमाणपदं भावव्युत्पत्याश्रयणात् प्रमीयत इति प्रमितिपरं करणेऽपि प्रयुज्यते। शाब्दप्रमाणमित्यत्र प्रमाणपदं प्रमितिपरमेव। ग्रन्थकारैरत्र शाब्दी प्रमाया एव लक्षणमुक्तम् अन्यथा शब्दप्रमाणलक्षणमिदमिति चेत् लक्षणस्थ शब्दविज्ञानजेति पदस्य शाब्दीप्रमा अनुमातो नातिरिक्तेति शङ्कानिराकरणपरकतया अवतरणं ग्रन्थकृतां न संगच्छेत। तत् करणं शब्दप्रमाणमिति शब्दप्रमाणलक्षणं पर्यवस्यति। तथाहि- **"ईश्वरो जगत् पालयतीति"** पदसमूहात्मकेन वाक्येन सह समनस्कश्रवणेन्द्रियसम्बन्धात् **"ईश्वरो जगत् पालयतीति"** वाक्यस्य प्रत्यक्षज्ञानं तस्य च ततः जायते, प्रत्यक्षप्रमाणं श्रवणेन्द्रियं करणम्। प्रमाणान्तरागोचरम भ्रान्तमीश्वरकर्तृकजगत्कर्मकपालनक्रिया-बोधकत्वमित्येवं रूपं वाक्यार्थवाक्ययोः बोध्यबोधकभावरूपं यज् ज्ञानं ज्ञायते तदेव शाब्दप्रमाणम्, शाब्दबोध इति आख्यायते। करणं वाक्यज्ञानं शब्दप्रमाणमित्यभिधीयते।'[4] तथा च वाक्यज्ञानस्यैव प्रमाणत्वेऽपि प्रकारविधया वाक्ये पि प्रमाणत्वव्यवहारः लोके संगच्छते । शाब्दबोधप्रक्रियाभेदश्चाग्रे च स्पष्टं विचारयिष्यते । तस्य च ग्रन्थकारनिर्दिष्टमिदं शाब्दप्रमाणलक्षण शाबरभाष्यस्थलक्षणसदृशम्। **"शास्त्र शब्दविज्ञानात् असन्निकृष्टेऽर्थे विज्ञानम्।"** इति हि शाबरभाष्यम्। अस्य भाष्यस्याभिहितान्वयवादिनां भाट्टानां सम्मतं व्याख्यानमित्थम्शब्दविज्ञानादित्यत्र ज्ञानपदं ज्ञानहेतुपरम्, असन्निकृष्टेऽर्थे इति सप्तम्यन्तयोर्न सामानाधिकरण्यं किन्तु वैयधिकरणयम्। ततश्चायमर्थः फलति प्रमाणान्तरानधिगते बाधितेऽर्थे ज्ञापकं शब्दज्ञानजन्यमर्थज्ञानं शब्दप्रमाणमिति। प्रत्ययान्तपदार्थज्ञानं शब्दजन्यं वाक्यार्थज्ञाने कारणमर्थात् वाक्यार्थज्ञानं शाब्दी प्रमा तत्करणं च पदोपस्थापित-पदार्थज्ञानमिति । तस्य च शब्दजन्यत्वाच्छब्दे प्रमाणव्यवहारोऽपि सङ्गच्छते।

अन्विताभिधानवादिनां गुरूणां सम्मता व्याख्या शब्दविज्ञानादित्यत्र शब्दज्ञानमव हेतुतयाभिहितम्, न तु ज्ञानहेतुपरं ज्ञानपदम्। अत्र च भावव्युत्पत्तिरेवाश्रिता, तेन शाब्दी प्रमितिरेव लक्ष्यते। तथा च शब्दविज्ञानापेक्षादात्ममनस्सन्निकर्षाद्यददृष्टार्थविषयं विज्ञानं तच्छाब्दमित्यर्थः। लक्षणे (भाष्योक्ते) शास्त्रमिति पदं वैदिकमेव शब्दमस्ति, लौकिकवचनानामनुमानविधयैव प्रामाण्यमिति द्योतयति। शब्दज्ञानं प्रमाणान्तरेणाप्रमितवाक्यार्थधीजनकमित्यर्थः। पदान्येव वाक्यम्, पदार्था एव वाक्यार्थ इत्यङ्गीकाराद्वाक्ये प्रमाणव्यवहारोऽपि सङ्गच्छते। अयं विशेषः- **“शास्त्रं शब्दविज्ञानादसन्निकृष्टेऽर्थे”** इति शाबरोक्ते लक्षणे सुनिश्चितपदं न दृश्यते । वार्तिककारैः भट्टाचार्यैः- **“असिन्नकृष्ट”** पदेनैवाधिगततत्वस्य बाधिततत्वस्य च व्यावृत्तिरत्राभिप्रेतेत्युक्तं तथा हि वार्तिकम्-

**असन्निकृष्टवाचा च द्वयमत्र जिहासितम् ।**
**तादूप्येण गृहीतत्वं तद्विपर्ययतो पि च ॥[5] इति**

च शाब्दनिर्णयस्थलक्षणे सुनिश्चितेति पदसत्वात् असन्निकृष्टपदेन मानान्तराधिगततत्वव्यावृत्तिरेवात्राभिप्रेतेति टीकाकारैः श्रीमदानन्द-बोधाचार्यैः व्याख्यातम्। “सुनिश्चितेति” पदेनाप्रमाण्यव्यावृत्तिरुक्ता। अप्रामाण्यं मिथ्यात्वाज्ञानसंशयैः त्रिधा भिन्नम्। मिथ्यात्वा-ज्ञानसंशयानां मध्ये मिथ्यात्वसंशययोरेव दुष्टकारणात् सम्भवः इति, तयोः व्यावृत्तिः सुनिश्चितेति पदेन सूच्यते इति सूचनायैव टीकाकारैः **“सुनिश्चिता-असन्दिग्धाविपर्यस्तस्वरूपेत्यर्थः”** इति व्याख्यातम्। विपर्ययो मिथ्याज्ञानं तद्व्यावृत्तिः सु+निश्चितेत्यत्रोपसर्गभागेन सूचिता। अज्ञानस्यानुत्पत्तिलक्षणाप्रामाण्यस्यानाद्यभावतया दोषा-दुत्पत्यसम्भवेन तद्व्यावृत्तिः “बुद्धिरिति” पदेनेव सिद्ध्यतीति तद्व्यावर्तकं पदान्तरं नापेक्षितमिति भावः । अज्ञानस्य दोषादुत्पत्य सम्भवश्च साम्प्रदायिकैरेवोक्तः । तदुक्तं भट्टवार्तिके-

**अप्रामाण्यं त्रिधा भिन्नं मिथ्यात्वाज्ञानसंशयैः।**
**वस्तुत्वाद् द्विविधस्यात्र सम्भवो दुष्टकारणात् ॥**
**अविज्ञाते तु दोषाणां व्यापारो नैव विद्यते ।।[6] इति ।।**

लक्षणेऽस्मिन् मतान्तरनिरासकानि मतान्तरनिरासकानि त्रीणि विशेषणानि विद्यन्ते शब्दविज्ञानजा, अर्थे, असिन्नकृष्टे इति । तैः क्रमशः शब्दस्यानुमानविधयैव प्रामाण्यं वदतां च बौद्धादीनां, विवक्षा शब्दार्थ इति च ब्रुवतां बौद्धादीनाम्, तथा आप्तोपदेशः शब्द इति वदतां नैयायिकानां मतानि निवार्यन्ते।

**शाब्दप्रमाणलक्षणे “अर्थे” इति पदव्यावर्त्यपक्षविचारः लक्षणस्थार्थपदकृत्यविमर्शः-**

बौद्धानामिदं मतं वक्तुरर्थविषयविवक्षाप्रमाणयोः शब्दः प्रमाणं नार्थमात्र इति । तदुक्तं धर्मकीर्तिना-

**नान्तरीयकताभावात् शब्दानां वस्तुभिः सह ।**
**नार्थसिद्धिस्ततस्ते हि वक्त्रभिप्रायसूचकाः ।।[7] इति ।।**

अयं भावः- यदि शब्दस्यार्थे प्रामाण्यं तर्हि कस्मादनाप्तप्रणीताद् वाक्यतो नार्थनिश्चयः प्रवृत्तिसामर्थ्य वा? यतो हि **“नद्यास्तीरे पंच फलानि सन्ति”** इत्याप्तानाप्तप्रणेतृकस्यास्य वचसः स्वरूपतो न कश्चन विशेषो दृश्यते। वक्ता तु शब्दाभिव्यक्तावेवोपयुज्यते न शब्दाकार्ये। तथाहि- यथा चक्षुष उन्मीलने सति से चक्षुः स्वसन्निकृष्टार्थप्रकाशने समर्थः स्वसम्बद्धमर्थं प्रकाशयति तथा शब्दोऽपि अर्थप्रकाशने समर्थश्चेत् वक्त्रा शब्दे उच्चरिते सति शब्दः स्वार्थं प्रकाशते। प्रकाशते चेदनाप्तवाक्यादप्यर्थनिश्चयो भवेत्। तथा च शब्देन नार्थसिद्धिः। एतदेव श्लोके पूर्वत्रदर्शित उक्तम्- शब्दार्थयोः नान्तरीयकता (अव्यभिचरितता) भावात् शब्देन नार्थसिद्धिरिति। कथन्तर्हि शब्दश्रवणसमनन्तरं श्रोतुः प्रवृत्तिरिति चेद्, उच्यते शब्दाः वक्तृविवक्षां प्रतिपादयन्ति विनैवार्थव्यवहारहेतुरिति। अथवा शब्दः मूलप्रमाणं गोचरयति, तेन प्रमाणेन व्यवहार इति । एतदेव पूर्वत्रोक्तं शब्दा वक्त्रभिप्रेतं सूचयेयुरिति।[8] इममेव शब्दस्यार्थासंस्पर्शितावादं बौद्धोक्तं प्राभाकाराः अपि समर्थयन्ति । तदुक्तं शालिकनाथेन-

**विनाप्यर्थं हि शब्देन प्रतीतिरुपजायते।**
**अङ्गुल्यग्रेऽस्ति करिणां यूथमित्येवमादिना ।।[9]**
**वक्ता तु केवलं शब्दव्यक्तावेवोपयुज्यते।**
**ज्ञानन्तु शब्दमात्रेण निरपेक्षेण जन्यते।।**
**तस्य ज्ञानं च वाक्येन लिङ्गभूतेन गम्यते।**
**ज्ञात्वैवार्थं ब्रवीतीति य एवमवधारितः।।**

इत्यादिना । तस्मात् विवक्षां प्रमाणान्तरं वा शब्दाः प्रकाशयन्ति नार्थमात्रमिति प्राप्ते-

**अर्थ एव शब्दगोचरः न तु विवक्षा**

अत्र समाधिरभिधीयते पूर्वोक्तमतनिराचिकीर्षयैव शाब्दप्रमाण-लक्षणे “अर्थे बुद्धि” रिति उक्तम्। एतत्पूर्वपक्षनिराकरणपरः संग्रहश्लोकः ग्रन्थकारैरेवं प्रदर्शितः।

**प्रवृत्त्या न विवक्षाधीर्मीयतेऽर्थैनिष्ठया।**
**प्रयोगहेतुतामेव पश्चादपि समीक्षते ।। इति ।।**

निराकरणप्रकारश्चेत्थम्- यस्मिन्नर्थे शब्दस्य शक्तिः स एव हि शब्दार्थः। शक्तिश्च बाह्यार्थे न त्वन्त्रे इति बाह्यार्थैकनिष्ठया प्रवृत्त्या ज्ञायते। तथा हि- मध्यमवृद्धस्य गवानयनं दृष्ट्वा प्रवृत्ति-गोचरबाह्यार्थविषयज्ञानपूर्विकास्येयं गामानयेत्त्युत्तमवृद्धवचनसम-नन्तरं व्युत्पित्सुरित्थमाकलयति बालः प्रवृत्तिः स्वतन्त्रप्रवृत्तित्वात्, मदीयस्वतन्त्रप्रवृत्तिवदिति। तथैव स्वात्मदृष्टान्तेन प्रवर्तकप्रत्यये शब्दपूर्वकत्वं चानुमाय तस्मिन् बाह्यार्थे शब्दानन्तरभाविनि शब्दस्य शक्तिं गृह्णाति। न तु विवक्षाप्रमाणान्तरयोः शब्दस्य शक्तिं गृह्णाति, प्रवृत्त्यविषयत्वा-त्तयोः। तदनु च प्रयोगान्तरेषु गां बधानाश्वमान-येत्यादिष्वा-नयनगोशब्दयोरुद्धारे तदर्थयोरप्युद्धारात् प्रक्षेपे च प्रक्षेपदर्शना-दन्वयव्यतिरेकाभ्यां गवादिविशेषेषु पदविशेषस्य सामर्थ्यं गृह्णाति। एवं च व्युत्पत्तिसमये बाह्यार्थविशेष एव शक्तिः गृह्यत इति स एव शब्दार्थः तमेव चार्थं शब्दो गोचरयति न तु विवक्षाधियं प्रमाणान्तरं वा गोचरयति। अन्यथा (यः शब्दशक्यो न सोऽपि शब्देन प्रकाश्यते चेत्) घटशब्दश्रवणानन्तरं पटेऽपि प्रवृत्तिप्रसङ्गः। तथा तु न भवति किंतु प्रवृत्तिः- शब्दश्रवणसमनन्तरं तच्छब्दनियतबाह्यार्थ एव दृश्यते। तथा च शब्दो बाह्यार्थगोचरां धियं जनयितुमीष्टे न तु

विवक्षादिगोचरां धियमिति सिद्धिम्। तदुक्तम्- **"प्रवृत्या न विवक्षाधीर्मीयतेऽर्थैकनिष्ठयेति।"** विवक्षाधीपदं प्रमाणान्तरस्या-प्युपलक्षकम्। प्रवृत्तेरिति हेतुः तस्य च अर्थेकनिष्ठयेति विशेषणम्। विवक्षाधीः प्रमाणान्तरं वा न शब्दगम्य; तयोः प्रवृत्यभावात्। बाह्यार्थ एवं शब्दगम्यः शब्दश्रवणसमनन्तरं तत्र प्रवृत्तिदर्शनादिति प्रयोगद्वयमत्र सूचितम्।

अत्र पूर्वपक्षः प्राप्तः **"अर्थ बुदध्वा वाक्यरचना भवति"** इति न्यायात् किंचिद् विवक्षितैव सर्वे वाद्व्यवहारं कुर्वन्ति। अन्यथा उन्मत्तव्यवहारवन्निरर्थकः स्याज्जनानां वाग्व्यवहार इतीमं सार्वत्रिकं नियममनुसृत्योत्तमवृद्धः किंचिद् विवक्षितैव वाक्यं ब्रूते। तदनु मध्यमवृद्धोऽपि स्वप्रयोक्तृगृतविवक्षा-मनुमानेनावगच्छति- **"एतद्वाक्यं विवक्षापूर्वकं"** वाक्यत्वात् मदीयवाक्यवत् इति। पश्चात् तत्र शब्दसामर्थ्यमवगच्छति । अतः शब्दाः वक्तुरभिप्रेतं सूचयन्ति इति ।

अत्रोच्यते व्युत्पन्नानां व्यवहारादेवं ज्ञायते शब्दप्रयोगे विवक्षा कारणम्, न तु विवक्षा शब्दस्य अर्थ इति। उत्तमवृद्धोदित-पदकदम्बश्रवणसमनन्तरं मध्यमवृद्धः पूर्व शब्दार्थमेवावगच्छति, तदनुसारेण बाह्यार्थ एव प्रवर्तते। यदि वक्त्रभिप्रायसूचकाः शब्दाश्चेत् एवं शब्दश्रवणानन्तरं बाह्यार्थेषु प्रवृत्तिर्न स्यात्। न ह्यन्यप्रतीत्यान्यत्राप्रतिपन्नेषु प्रवृत्तिः सम्भवति, अतिप्रसङ्गात्। भ्रान्तितः प्रवृत्तौ च शब्दविशेषादर्थविशेषे प्रवृत्तिनियमा-भावप्रसङ्गात् संवादाभावप्रसङ्गाच्च। पश्चात् स्वात्मकदृष्टान्तेन एतच्छब्दप्रयोगस्य हेतुतामेव विवक्षायामवगच्छति न तु सा शब्दस्य अर्थ इति, विवक्षायामगृहीतशक्तिकत्वात्। एतदेवोक्तं मूले **"प्रयोगहेतुतामेव पश्चादपि समीक्षते"** इति। किं च विवक्षामात्रं शब्दा बोधयन्तीति वक्तुं न शक्यते, तथा सति घटमानयेति शाब्दबोधोत्तरं पटानयने प्रवृत्तिः स्यात्। तथाहि- विवक्षा शब्दगम्येति वदद्भिरेवं वक्तव्यं भवति, विषयं विना विवक्षा न जायत इति विषयः आक्षेपलभ्यः आक्षेपलभ्ये च विषये प्रवृत्तिरिति। एवं विषयाक्षेपे यं कंचिद्विषयमवलम्ब्येतेति घटमानयेति शब्दश्रवणानन्तरं पटानयनेऽपि प्रवृत्तिः स्यादेवं एतदतिप्रसंगवार-णायार्थव्यावृत्तविवक्षैव शब्दगम्येति वक्तव्यम्। तथा च बाह्यार्थः शब्दगम्य इति सिद्धम्। तदुक्तं जयन्तभट्टैरपि-

**विवक्षायां हि शब्दस्य लिङ्गत्त्वमिव दृश्यते ।**
**आकाश इव कार्यत्वान्न वाचकतया पुनः ।।**
**शब्दादुच्चरिताच्च वाच्यविषया तावत् समुत्पद्यते ।**
**संवित्तिस्तदनन्तरन्तु गमयेत् कामं विवक्षामसौ।।**
**अर्थोपग्रहवर्जिता तु नियमात् सिन्द्वैवमाजीविता ।**
**तद्वाच्यार्थविशेषिता त्वविदिते नैषां तदर्थे भवेत् ।।**[10]

किं च शब्दस्यार्थव्यावृत्तविवक्षागमकत्वे गौरवात् अर्थगमकत्वमेव लाघ-वात् स्वीक्रियतां को दोषः। न चार्थः विवक्षाया उपलक्षणमिति वाच्यम्, नित्यसङ्घटितत्वात् तेन विवक्षायाः। अन्यथा (अर्थः उपलणक्षमिति चेत्) क्वचिदर्थमन्तरेणापि विवक्षा प्रतीयेत, हंसावगम इव राजमन्दिरम्। अपि च विवक्षादेः प्रयोगलिङ्गगम्य-तयाऽनन्यलभ्यत्वाभावान्न शब्दार्थत्वम्। तदुक्तम्- **"अनन्यलभ्यः शब्दार्थ"** इति। अपदार्थस्य वाक्यार्थत्वे पूर्वोक्तातिप्रसंगो दुर्वारः। शब्दस्य विवक्षाऽनुमापकत्वमप्य-नेकान्तम्- सविकल्पकप्रत्यक्षे "चायं घट" इति विनापि विवक्षां शब्दोल्लेखस्य दर्शनात्। तस्माद् अर्थ एव शब्दगोचरः। यस्तु **"नान्तरीयकताभावाद्"** इत्यादिना बौद्धैः **"विनाप्यर्थं हि शब्देने"** त्यादिना च प्राभाकरैः शब्दस्यार्था-संस्पर्शितावाद उत्थापितः तत्र समाधिरभिधीयते-कोऽयमर्थासंस्पर्शः भवतामभिमतः? यदि संयोगसमवाययोरभावः सोऽनुज्ञात एव; क्षुरमोदकशब्दोच्चारणे मुखस्य पाटनपूरणयोरदर्शनात्। यदि कार्यकारणनिमित्तनैमित्ति-काश्रयाश्रयिभावादीनामभावः सोऽप्यनुज्ञात एव; शब्दार्थ-योर्नित्यत्वात्,[11] भिन्नाश्रयकत्वाच्च। संज्ञा-संज्ञिलक्षणसम्बन्धस्या-भावः तर्हि दर्शनविरुद्धत्वात् स नाङ्गीकार्यः। तथा हि-सर्वत्र नो दर्शनं प्रमाणम्। प्रत्यायकः शब्द इति प्रत्ययं दृष्ट्वावगच्छामः। न च यदि प्रत्यायकः शब्दः प्रथमश्रुतः किं न प्रत्याययतीति वाच्यम्; यावत् कृत्वः श्रुतेनेयं संज्ञायं संज्ञीत्यवधारितं भवति, तावत्कृत्वः श्रुतादर्थावगमः इति वदामः। यथा चक्षुर्द्रष्ट बाह्येन प्रकाशेन विना न प्रकाशयतीत्यद्रष्ट न भवति। तथैव शब्दोऽपि प्रथमश्रुतः शक्तिग्रहणं विना अर्थ न प्रत्ययायतीत्यप्रत्यायको न भवति। तथा च शब्दार्थयोः वाच्यवाचकसम्बन्ध इत्यर्थसंस्पर्शितव शब्दस्य सिद्ध्यति ।

यदि शब्दार्थयोः ननु यदि शब्दोऽर्थसंस्पर्शी तर्हि कस्मादनाप्तवाक्यतो नार्थनिश्चयः? **"नद्यास्तीरे पंच फलानि सन्ती"**त्याप्तानाप्तप्रणेतृकस्यास्य वचसः स्वरूपतो विशेषस्यादर्श-नादिति चेत्। उच्यते- शब्दादर्थप्रत्ययजननस्य सर्वत्राप्तवाक्येषु दृष्टचरस्य क्वचिदपवाददर्शनमात्रेण निराकर्तुमशक्यत्वात्, अर्थसंस्पर्शित्वमेव शब्दस्य स्वभाव इत्यवधार्यते। यद्यर्थाप्रत्याय-कत्वमेवार्थादर्थासंस्पशित्वमेव शब्दस्य स्वभावो भवेत्तर्हि कदापि शब्दादर्थप्रत्ययो न भवेत्। अर्थासंस्पर्शी शब्दोऽपि कदाचिदर्थसंस्पर्श जनयति चेत् ग्रन्धाग्राहकंनेत्रमपि कदाचिद् गन्धग्राहकं भवेत्। क्वचिद् व्यभिचारदर्शनं च इन्द्रियजन्यशुक्तिकारजतबोधवत् समाधेयम्। तदुक्तं न्यायमंजर्याम् ।[12]

**व्यभिचारविशङ्कामप्यादृत्येंद्रियादिवत्।**
**स्वमर्थमभिधातुं किं समर्था न पदावली ।। इति ।।**

ननु शुतिकारजतादिबुद्धिषु इन्द्रियादिगतदोषाः हेतवः; शब्दे तु पुरुषदोषाः किं कुर्युः पुरुषस्य हि गुणवतो दोषवतो वा शब्दोच्चारणमात्रे एव व्यापारः; ततः परं तु कार्यं शब्दायत्तमेवेति तत्स्वरूपकृत एवायं विभ्रमः इति चेत् । हन्त। तर्हि तेनैव न्यायेन वक्तरि गुणवति सति नद्यास्तीरे फलानि सन्तीति सम्यक्प्रत्ययेऽपि शब्दस्यैव व्यापारात् पुरुषस्योच्चारणमात्रे चरितार्थत्वान्नैकान्ततः शब्दस्यार्थासंस्पर्शित्वमेव स्वभाव इति भवतां पक्षोऽपि न सिद्ध्यति।

वस्तुतस्तु शब्दानामुत्सर्गतोऽर्थसंस्पर्शित्वमेव स्वभावः क्वचिच्च वक्तृदोषादयथार्थबोधः। तथा हि लोके क्वचिन्नद्यादिवाक्याद्विज्ञाने

उत्पन्ने तरङ्गिणीतीरमनुसरन्ननासादितफलः प्रवृत्तबाधकप्रत्ययः पुमान् पुरुषमेवाधिक्षिपति हा धिक् तेन दुरात्मना विप्रलब्धोऽस्मीति न शब्दम्। तेनैतज् ज्ञायते पुरुषदोषकृत एव शब्दाद्विप्लवो न स्वरूपनिबन्धनः। तदुक्तं जयन्तभट्टैः-

**पदार्थानान्तु संसर्गमसमीक्ष्य प्रजल्पतः ।**
**वक्तुरेव प्रमादोऽयं न शब्दोऽत्रापराध्यति ।।**[13]
**तेनाभिधातृदौरात्म्यकृतेयमयथार्थता ।**
**प्रत्ययस्येति शब्दानां नार्थासंस्पर्शिता स्वतः ।। इति ।।**

किं च लोके शिष्यः कश्चित् गुरोरादेशवाक्यं श्रुत्वा पूर्व तदनुसारेण यत् किंचित् कार्यं करोति। पश्चात् क्वचित् यदि गुरोर्विवक्षितं कार्य न तद्भवति चेत्तदा मद्विवक्षितं त्वया न कृतमिति गुरुः विवक्षितकार्यमेव पुनः स्पष्टयति। यदि विवक्षैव शब्दस्यार्थश्चेत् शब्दश्रवणानन्तरं विवक्षापि ज्ञातेति कदापि शिष्यस्याविवक्षित-कार्यकरणे प्रवृत्तिर्न स्यात्। अत एवाकामेनापीदं स्वीकार्य बाह्यार्थमेव शब्दो बोधयति, शब्दार्थयोः बोध्यबोधकभावसम्बन्धो नित्य इति।

**पाद टिप्पणी**

[1]यथा शब्दान्मानासत्तत्वमीक्ष्यते" इति वचनादिदं ग्रन्थारैरेव सूचितम्

[2]चित्सुखी, २.१२.

[3]शाब्दनिर्णय,५.

[4]एतच्च नैयायिकप्रक्रियया प्रत्यक्षप्रमाणभिन्नं शब्दप्रमाणमिति प्रतिपिपादयिषयोक्तम्। वाक्य किम् ? वाक्यार्थः कः इत्यादिकमनुपदमेव शाबरभाष्योक्तशब्दप्रमाणलक्षण-विवरणावसरे स्पष्टीकरिष्यते ।

[5]ताद्रूप्येण प्रतीतत्वं तद्विपर्ययतो पि च" इति वेदान्तकौमुद्यां उद्धृतं वाक्यं लभ्यते । मूलं श्लोकवार्तिकम्- १.२.१६७.

[6]श्लोकवार्तिकम् २.५४.

[7]प्रमाणवार्तिकम्

[8]विकल्पयोनयः शब्दा विकल्पाः शब्दयोनयः। तेषामन्योन्यसम्बन्धे नार्थं शब्दाः स्पृशन्त्यमी ॥ न्या. म., पृ. १४५

[9]प्रकरणपंचिका,श्लोकाः,३.११.२८

[10]न्याय.मं.,पृ.सं.१४३.

[11]नित्यस्य शब्दस्य नित्येनार्थेन नित्यस्सम्बन्ध इति "औत्पत्तिकस्तु" (जै. सू.१.१.५) शब्दार्थसम्बन्धनित्यताधिकरणे निर्णीतम् ।

[12]अन्यत्राप्युक्तम्- यत्पुनः करशाखाग्रे करिसत्तावबोधकम्। वाक्यं व्यभिचरत्यर्थमर्थासंस्पर्शितोदिता॥ इन्द्रियप्रतिबन्धैव कर्तव्या तन्निराक्रिया। यस्मादिन्द्रियजा बुद्धिरप्यर्थव्यभिचारिणी॥ निर्दोषन्द्रियजा नैषा यद्यर्थव्यभिचारिणी। आप्तोपदेशजाप्येषा नार्थं व्यभिचरिष्यति।। न्यायसारे शब्दप्रकरणे

[13]न्या.मृ.